अर्हम् ।

पूज्यपाद परमगुरु-आचार्य श्री विजयनीतिसूरीश्वरपादपद्मेभ्यो नमः ।

पण्डित श्री पार्श्वनागगणिविरचितम्—

# ॥ आत्मानुशासनम् ॥

सकलत्रिभुवनतिलकं, प्रथमं देवं प्रणम्य सर्वज्ञम् । आत्मानुशासनमहं, स्वपरहिताय प्रवक्ष्यामि ॥१॥
समविषमभित्तियोगे, विविधोपद्रवयुतेऽतिबीभत्से । अहिवृश्चिकगोधेरक--कृकलासगृहोलिकाकीर्णे॥२॥
कारावेश्मनिवासे, भूशयनं जनविमर्दसङ्कोचः । साधिक्षेपालापाः, शीतातपवातसन्तापाः ॥३॥
मूत्रपुरीषनिरोधः,क्षुत्तृट्पीडाविनिद्रताभीतिः । अर्थक्षतिरन्यदपि च, चित्तवपुः क्लेशकृत्प्रचुरम् ॥४॥
अनुभूतं सकलमिदं, पूर्वार्जितकर्मपरिणतिवशेन । संसारे संसरता, प्रत्यक्षं जीव ! भवतेह ॥५॥
मनसापि न वैराग्यं, व्रजसि मनागपि तथापि मूढात्मन् ! । गुरुकर्मप्राग्भारा--वेष्टित!निर्नेष्टसच्चेष्ट ! ॥६॥

उद्विजसे दुःखेभ्यः, समीहसे सर्वदेव सौख्यानि । अथ च न करोषि तत्त्वं, येन भवत्यभिमतं सकलम् ॥७
यज्जीव ! कृतं भवता, पूर्वं तदुपागतं तवेदानीम् । किं कुरुषे परितापं, सह मनसः परिणतिं कृत्वा ॥८॥
यदि भोः पूर्वाचरितैरशुभैः, संढौकितं तवाशर्म । तत्किं परे प्रकुप्यसि, सम्यग्भावेन सह सर्वम् ॥९॥
मा व्रज खेदं मागच्छ, दीनतां मा कुरु क्वचित्कोपम् । तत्परिणमत्यवश्यं, यदात्मनोपार्जितं पूर्वम् ॥१०॥
सुखदुःखानां कर्त्ता, हर्त्ताऽपि न कोऽपि कस्यचिज्जन्तोः । इति चिन्तय सद्बुद्ध्या, पुराकृतं भुज्यते कर्म ॥
तत्प्रार्थितमपि यत्नान् ,न भवेदिह यन्न पूर्वविहितं स्यात् । मनसि न कार्यः शोको,यद्भाव्यं तद्बलाद्भवति॥
क्रियते नैव विषादो, विपत्सु हर्षो न चैव सम्पत्सु । इत्येष सतां मार्गः, श्रयणीयः सर्वदा धीरैः ॥१३॥
पूर्वकृतसुकृतदुष्कृतवशेन, यदिह हंत सम्पदो विपदः । आयान्ति तदन्यस्मिन्, कृतेन किं रोषदोषेण॥१४
यदिपूर्वकर्मवशवर्त्तिनो, जनाः प्राप्नुवन्ति सुखदुःखम् । तद्भो निमित्तमात्रं, परो भवत्यत्र का भ्रान्तिः१५
मित्रं भवत्यमित्रं, स्वजनोऽपि परो न बन्धुरपि बन्धुः । कर्मकरोऽप्यविधेयः, पुंसां विपराङ्मुखे दैवे॥१६॥
न स्वामिनो न मित्रान्न,बान्धवात्पक्षपातिनो न परात् । किं बहुना कस्मादपि,न सरति कार्यं विधौ विमुखे॥
यदि गम्यते सकाशे, परस्य चाटूनि यदि विधीयन्ते । तदपि सुकृतेन विना, केनापि भवेत्परित्राणम् ॥१८॥
आयान्ति बलवतामपि, यदि विपदो देवदानवादीनाम् । तद्भो स्वल्पतरायुषि, नरजन्मनि को विषादस्ते१९



Scanned by CamScanner

कस्य स्यान्न स्खलितं पूर्णाः,सर्वे मनोरथाः कस्य । कस्येह सुखं नित्यं, दैवेन न खण्डितः को वा॥२०॥
स्वच्छाशयाः प्रकृत्या,परहितकरणोद्यता रता धर्म्मे । सम्पदि नहि सोत्सेका, विपदि न मुह्यन्ति सत्पुरुषाः॥
न सबाष्पं बहुरुदितैर्न, पूत्कृतैर्नैव चित्तसन्तापैः । न कृतैर्दीनालापैः, पुराकृतात् कर्मणो मुक्तिः ॥२२॥
बहुविविधापन्मध्ये,क्षणमपि यज्जीव्यते तदाश्चर्यम् । न चिरं क्षुधितमुखस्थं, सरसफलमचर्वितं तिष्ठेत्॥२३
नूनं समेऽपि यत्ने, भाव्यं यद् यस्य तस्य तद् भवति । एकस्य विभवलाभः, छेदः प्रत्यक्षमपरस्य ॥२४॥
विकटाटव्यामटनं, शैलारोहणमपांनिधेस्तरणं । क्रियते गुहाप्रवेशो, विहितादधिकं कुतस्तदपि ॥२५॥
यद्यपि पुरुषाकारो, निरर्थको भवति पुण्यरहितानाम् । त्यक्तव्यो नैवात्मा, यथोचितं तदपि करणीयम्२६॥
तिर्यक्त्वे मनुजत्वे, नारकभावे तथा च देवत्वे । न चतुर्गतिकेऽपि सुखं, संसारे तत्त्वतः किञ्चित् ॥२७॥
अस्मिन्निष्टवियोगा, जन्मजरामरणपरिभवा रोगाः । त्यक्तो यतिभिरसङ्गै–स्तत एव ह्येष संसारः ॥२८॥
यस्य कृते त्वं मोहा--द्विदधास्यविवेकपातकं सततम् । न भविष्यति तत् शरणं, कुटुम्बकं घोरनरकेषु॥२९॥
न विधीयतेऽनुबन्धो, येनापगमेऽपि भवति नो दुःखम् । आयाति याति लक्ष्मी–र्यतोऽतिचपलास्वभावेन३०
श्रीर्जलतरङ्गतरला, सन्ध्यारागस्वरूपमथ रूपम् । ध्वजपटचपलं च बलं, तडिल्लतोद्योतसममायुः ॥३१॥
ये चान्येऽपि पदार्था, दृश्यन्ते केऽपि जगति रमणीयाः । तेषामपि चारुत्वं, न विद्यते क्षणविनाशित्वात्३२

न गजैर्न हयैर्न रथै--र्न भटैर्न धनैर्न साधनैर्बहुभिः । न च बन्धुभिषग्देवै--र्मृत्योः परिरक्ष्यते प्राणी॥३३॥
विषयव्याकुलितमना, यस्य निकृष्टस्य कारणे वपुषः । पीडयसे प्राणगणं, तदपि न तव शास्वतं मन्ये३४
तारुण्ये नलिनीदल,-संस्थितजलबिन्दुगत्वरे दृष्टे । वाताहतदीपशिखा--तरलतरे जीवितव्ये च ॥३५॥
विभवे च मत्तकरिवर--कर्णचले चञ्चले शरीरेऽपि । पापमशर्मकरं ते, क्षणमपि नो युज्यते कर्त्तुम् ॥३६॥
जननी जनको भ्राता, पुत्रो मित्रं कलत्रमितरो वा । दूरीभवन्ति निधने, जीवस्य शुभाशुभं शरणम्॥३७
यत्परलोकविरुद्धं, यल्लज्जाकरमिहैव जनमध्ये । अन्त्यावस्थायामपि, तदकरणीयं न करणीयम् ॥३८॥
संप्राप्ते नरजन्मनि, सदुर्लभे निजहितं परित्यज्य । किं कल्मषाणि कुरुषे दृढानि निजबन्धनानीह ॥३९॥
भवकोटीष्वपि दुर्लभ--मिदमुपलभ्येह मानुषं जन्म । येन न कृतमात्महितं, निरर्थकं हारितं तेन ॥४०॥
मा चिन्तय परिहारान्, परविभवं माभिवाञ्छ मनसापि । मा ब्रूहि परुषवचनं परस्य पीडाकरं कटुकम्॥४१॥
पैशून्यं मात्सर्यं, निघृणतां कुटिलतामसन्तोषम् । कपटं साहंकारं, ममत्वभावं च विजहीहि ॥४२॥
ये विदधन्त्युपतापं, परस्य लुब्धा धने कृतान्यायाः । जीवितयौवनविभवा--स्तेषामपि शास्वता नैव॥४३॥
इष्टं सर्वस्य सुखं, दुःखमनिष्टं विभाव्य मनसीदम् । मा चिन्तय परपापं, क्वचिदप्यात्मनि यथा तद्वत् ॥४४
कायेन मानसेन च, वचनेन च तद्वदेव कर्त्तव्यम् । येन भवे वैराग्यं. प्रशान्तता तापशमनं च ॥४५॥



Scanned by CamScanner

व्याधिर्धनस्य हानिः, प्रियविरहो दुर्भगत्वमुद्वेगः । सर्वत्राशाभङ्गः, स्फुटं भवत्यकृतपुण्यस्य ॥४६॥
न गृहे न बहिर्न जने, न कानने नान्तिकेन वा दूरे । न दिने च क्षणदायां, पापानां भवति रतिभावः ॥४७॥
दिवसं गतं न रजनी, रजनी याता न याति दिवसं च । दुष्कृतिनां पुरुषाणा-मनन्तदुःखौघतप्तानाम् ॥४८॥
इह जीवतां परिभवो, घोरे नरके गतिर्मृतानान्तु । किं बहुना जीवानां, पापात्सर्वाणि दुःखानि ॥४९॥
ये स्वामिनं गुरुं वा, मित्रं वा वञ्चयन्ति विश्वस्तम् । अपरं तु नास्ति तेषां, नूनं सुखमुभयलोकेऽपि ॥५०॥
सत्यं जीवेषु दया, दानं लज्जा जितेन्द्रियत्वं च । गुरुभक्तिः श्रुतममलं, विनयो नृणामलङ्कारः ॥५१॥
यद्भक्तिः सर्वज्ञे, यद्यत्नस्तत्प्रणीतसिद्धान्ते । यत्पूजनं गुणानां, फलमेतज्जीवितव्यस्य ॥५२॥
चिन्तयितामशुचित्वं, हितवचनं शृण्वतां शमं दधताम् । सन्मानयतां मुनिजन-महो नयन्तीह पुण्यवताम् ॥
परिहृतपरनिन्दानां, सर्वस्योपकृतिकरणनिरतानाम् । धन्यानां जन्मेदं, धर्मपराणां सदा व्रजति ॥५४॥
मानुषतामायुष्कं, बोधिं च सुदुर्लभां सदाचारम् । नीरोगतां च सुकुले, जन्म पटुत्वं च करणानाम् ॥५५॥
आसाद्यैवं सकलं, प्रमादतो मा कृथा वृथा हन्त । स्वहितमनुतिष्ठ तूर्णं, येन पुनर्भवसि नो दुःखी ॥५६॥
सामग्रीं परिपूर्णा-मवाप्य विदुषा तदेव कर्त्तव्यम् । संसृतिगहने भीमे, भूयोऽपि न भूयते येन ॥५७॥
यावच्छरीरपटुता यावन्न जरा न चेन्द्रियग्लानिः । तावन्नरेण तूर्णं स्वहिते प्रयुद्यमः कार्यः ॥५८॥

Scanned by CamScanner

त्यज हिंसां कुरु करुणां, सम्यक् सर्वज्ञशासनेऽभिहिताम्। विजहीहि मानमाया--लोभानृतरागविद्वषान्॥५९॥
धर्मपराणां पुंसां. जीवितमरणे सदैव कल्याणम्। इह जीवतां बहुतपः, सद्गतिगमनं मृतानां च ॥६०॥
यद्वदुडूनां शशभृत्, शैलानां मेरूपर्वतो यद्वत्। तद्वद्धर्माणामिह, धर्मप्रवरो दयासारः ॥६१॥
अपि लभ्यते सुराज्यं, लभ्यन्ते पुरवराणि रम्याणि। नहि लभ्यते विशुद्धः, सर्वज्ञोक्तो महाधर्म्मः॥६२॥
लाङ्गलसहस्रभिन्नेऽपि, नास्ति धान्यं यथोखरे क्षेत्रे। तद्वज्जन्तूनामिह, धर्मेण विना कुतः सौख्यम् ६३॥
यद्वन्न तृषः शान्ति--र्जलं विना क्षुधो विना च नान्नेन। जलदं विना न सलिलं न, शर्म धर्माद्दते तद्वत् ॥६४॥
सत्स्वामी सन्मित्रं, सद्बन्धुः सत्सुतः सत्कलत्रं च। स त्स्वजनः सद्भृत्यो. धर्मादन्यदपि सत्सर्वम् ॥६५॥
अतिनिर्म्मला विशाला, सकलजनानन्दकारिणी प्रवरा[1]। कीर्त्तिर्विद्या लक्ष्मी--र्धर्मेण विजृम्भते लोके ॥६६॥
आरोग्यं सौभाग्यं, धनाढ्यता नायकत्वमानन्दः। कृतपुण्यस्य स्यादिह, सदा जयो वाञ्छितावाप्तिः ॥६७॥
सरभससुरगणसहितः, सुरयोषिज्जनितहर्षसङ्गीतः। सुरलोके सुरनाथो, भवति हि पुण्यानुभावेन ॥६८॥
न करिष्यसि चेद्धर्म्मं, पुनराप्स्यसि दुर्गतौ विशेषेण। दहनच्छेदनभेदन--ताडनरूपाणि दुःखानि ॥६९॥
गच्छद्भिरपि प्राणै--र्बुद्धिमतां तन्न युज्यते कर्त्तुम्। उभयत्र यद्विरुद्धं, दीर्घभवभ्रमणकृदपथ्यम् ॥७०॥
अविवेकिनां नराणां, पुनरिह जननं पुनर्भवे मरणम्। कुर्वन्ति पण्डितास्तद् भूयोरपि न भूयते येन७१॥

१ रभसो वेगहर्षयोरिति विश्वः।

कुरु भक्तिं गुण(जग)दीशे, तदागमे गुरुषु विदिततत्त्वेषु । अपवर्गोपरि रागं; संसारोपरि विरागं च॥७२॥
तत्किमपि कुरु विदित्वा, सद्गुरुतो ज्ञानमुत्तमं ध्यानम् । येनेह पूज्यसे त्वं, परत्र मुक्तिं समाप्नोषि॥७३॥
यत्र न जरा न मरणं,न भवं न च परिभवो न च क्लेशः । योगक्रियया ज्ञानात्, ध्यानादासाद्यते मुक्तिः॥
मत्वैवं कलिसारं, संसारमनित्यतां च जगतोऽस्य । ज्ञानयुतं ध्यानं कुरु, लभसे येनाक्षयं मोक्षम् ॥७५॥
इति पार्श्वनागविरचित-मनुशासनमात्मनो विभावयताम् । सम्यग्भावेन नृणां, न भवति दुःखं कथञ्चिदपि॥
द्व्यग्रलचत्वारिंशत्, समधिकवत्सरसहस्रसंङ्ख्यायाम्[१०४२] । भाद्रपदपूर्णिमास्यां बुधोत्तरा भाद्रपदिकायाम् ॥७७

卐卐 ॥ इति श्री आत्मानुशासनं समाप्तम् ॥ 卐卐

——:(卐):——

દ્રવ્યાનુયોગાચાર્ય પંન્યાસજી મહારાજ
શ્રી સુભદ્ર વિજયજી ગણિવર્ય ચિત્કોષ.

॥ अथ शुद्धिपत्रकम् ॥

| अशुद्ध | शुद्ध | पत्र | पृ. | पं. | अशुद्ध | शुद्ध | पत्र | पृ. | पं. |
|---|---|---|---|---|---|---|---|---|---|
| गृहीतुं | ग्रहीतुं | ७ | १ | ४ | रत्नमाल | रत्नमाला | ११ | १ | ५ |
| गृहीता | ग्रहीता | ७ | २ | १ | भौजयते | भाजयते | ४३ | २ | ५ |
| साऽपि | सोऽपि | ८ | १ | ११ | ऽर्हताम् | ऽर्हता | ४६ | १ | ४ |
| षष्ठीय | षष्टीय | ९ | १ | १२ | सव | सर्व | ४६ | २ | १ |
| कुशलप्रदा | कुशलप्रदाः | १९ | १ | १३ | वार | वीर | ४७ | १ | ४ |